प्रथमा दीक्षाः सम्भाषणम्

मित्रयोः सम्भाषणम्

सह-विना

शिशिरः - अखिल । कोऽपि नास्ति किं गृहं

अखिलः -अहम् एकः एव अस्मि । पिता अम्बया सह सङ्गीतकार्यक्रमं गतवान् । अग्रजा अरुणया सह चित्रमन्दिरं गतवति । अनुजः बालैः सह क्रीडति ।

शिशिरः - भवन्तं विना सर्वेऽपि गतवन्तः । भवान् मया सह आगच्छतु । मम माता आपणं गत्वा पुण्याणि आनयतु इति उक्तवती । अहं स्यूतेन विना एव आगतवान् ।

अखिलः - चिन्ता मास्तु । अहं स्यूतं ददामि । धनेन विना आगतम् वा इति पश्यतु ।

शिशरः - तिष्ठतु । प्रथमं धनमस्ति वा इति पश्यामि । किञ्चित् जल ददातु भोः ।

अखिलः - स्वीकरोतु, तिष्ठतु कार्फी करोमि । भवान् शर्करया विना कार्फी पिबति उत शर्करया सह ?

शिशिरः -अहं शर्करया सह एव पिबामि । किन्तु मास्तु, इदानीं भवतः किमर्थं क्लेशः ?

अखिलः - क्लेशः नास्ति । ममापि काफीसमयः एषः तिष्ठतु, मया सह कार्फी पिबतु ।